Vālmīki

Rāmāyaṇa III.40.27 ff.

Der vollständige Text des Rāmāyana kann von der Seite http://sanskrit.gde.to/ aus gefunden werden. Die Devanāgarī-Version beruht auf dem ursprünglichen E-Text von Prof. Muneo Tokunaga von der Universität Kyoto, der die kritische Edition des Rāmāyaṇa zusammen mit seinen Schülern für alle nicht-kommerziellen Zwecke frei zugänglich gemacht hat.

प्रच्छादनार्थं भावस्य न भक्षयति संस्पृशन् ।
तस्मिन्नेव ततः काले वैदेही शुभलोचना ॥ २७ ॥

कुसुमापचये व्यग्रा पादपानत्यवर्तत ।
कर्णिकारानशोकांश्च चूटांश्च मदिरेक्षणा ॥ २८ ॥

कुसुमान्यपचिन्वन्ती चचार रुचिरानना ।
अनर्हारण्यवासस्य सा तं रत्नमयं मृगम् ।
मुक्तामणिविचित्राङ्गं ददर्श परमाङ्गना ॥ २९ ॥

तं वै रुचिरदण्तौष्ठं रूप्यधातुतनूरुहम् ।
विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत ॥ ३० ॥

स च तां राम दयितां पश्यन्मायामयो मृगः ।
विचचार ततस्तत्र दीपयन्निव तद्वनम् ॥ ३१ ॥

अदृष्टपूर्वं दृष्ट्वा तं नानारत्नमयं मृगम् ।
विस्मयं परमं सीता जगाम जनकात्मजा ॥ ३२ ॥

सा तं सम्प्रेक्ष्य सुश्रोणी कुसुमानि विचिन्वती ।
हेमराजत वर्णाभ्यां पार्श्वाभ्यामुपशोभितम् ॥१॥

प्रहृष्टा चानवद्याङ्गी मृष्टहाटकवर्णिनी ।
भर्तारमपि चाक्रन्दल्लक्ष्मणं चैव सायुधम् ॥२॥

तयाहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ ।
वीक्षमाणौ तु तं देशं तदा ददृशतुर्मृगम् ॥३॥

शङ्कमानस्तु तं दृष्ट्वा लक्ष्मणो राममब्रवीत् ।
तमेवैनमहं मन्ये मारीचं राक्षसं मृगम् ॥४॥

चरन्तो मृगयां हृष्टाः पापेनोपाधिना वने ।
अनेन निहता राम राजानः कामरूपिणा ॥५॥

अस्य मायाविदो माया मृगरूपमिदं कृतम् ।
भानुमत्पुरुषव्याघ्र गन्धर्वपुरसंनिभम् ॥६॥

मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघव ।
जगत्यां जगतीनाथ मायैषा हि न संशयः ॥७॥

एवं ब्रुवाणं काकुत्स्थं प्रतिवार्य शुचिस्मिता ।
उवाच सीता संहृष्टा छद्मना हृतचेतना ॥८॥

आर्यपुत्राभिरामोऽसौ मृगो हरति मे मनः ।
आनयैनं महाबाहो क्रीडार्थं नो भविष्यति ॥९॥

इहाश्रमपदेऽस्माकं बहवः पुण्यदर्शनाः ।
मृगाश्चरन्ति सहिताश्चमराः सृमरास्तथा ॥१०॥

ऋक्षाः पृषतसङ्घाश्च वानराः किनरास्तथा ।
विचरन्ति महाबाहो रूपश्रेष्ठा महाबलाः ॥११॥

न चास्य सदृशो राजन्दृष्टपूर्वो मृगः पुरा ।
तेजसा क्षमया दीप्त्या यथायं मृगसत्तमः ॥१२॥

नानावर्णविचित्राङ्गो रत्नबिन्दुसमाचितः ।
द्योतयन्वनमव्यग्रं शोभते शशिसंनिभः ॥१३॥

अहो रूपमहो लक्ष्मीः स्वरसम्पच्च शोभना ।
मृगोऽद्भुतो विचित्रोऽसौ हृदयं हरतीव मे ॥१४॥

यदि ग्रहणमभ्येति जीवन्नेव मृगस्तव ।
आश्चर्यभूतं भवति विस्मयं जनयिष्यति ॥१५॥

समाप्तवनवासानां राज्यस्थानां च नः पुनः ।
अन्तःपुरविभूषार्थो मृग एष भविष्यति ॥१६॥

भरतस्यार्यपुत्रस्य श्वश्रूणां मम च प्रभो ।
मृगरूपमिदं दिव्यं विस्मयं जनयिष्यति ॥१७॥

जीवन्न यदि तेऽभ्येति ग्रहणं मृगसत्तमः ।
अजिनं नरशार्दूल रुचिरं मे भविष्यति ॥१८॥

निहतस्यास्य सत्त्वस्य जाम्बूनदमयत्वचि ।
शष्पबृस्यां विनीतायामिच्छाम्यहमुपासितुम् ॥१९॥

कामवृत्तमिदं रौद्रं स्त्रीणामसदृशं मतम् ।
वपुषा त्वस्य सत्त्वस्य विस्मयो जनितो मम ॥२०॥

तेन काञ्चनरोम्णा तु मणिप्रवरशृङ्गिणा ।
तरुणादित्यवर्णेन नक्षत्रपथवर्चसा ।
बभूव राघवस्यापि मनो विस्मयमागतम् ॥२१॥

एवं सीतावचः श्रुत्वा दृष्ट्वा च मृगमद्भुतम् ।
उवाच राघवो हृष्टो भ्रातरं लक्ष्मणं वचः ॥२२॥

पश्य लक्ष्मण वैदेह्याः स्पृहां मृगगतामिमाम् ।
रूपश्रेष्ठतया ह्येष मृगोऽद्य न भविष्यति ॥२३॥

न वने नन्दनोद्देशे न चैत्ररथसंश्रये ।
कुतः पृथिव्यां सौमित्रे योऽस्य कश्चित्समो मृगः ॥२४॥

प्रतिलोमानुलोमाश्च रुचिरा रोमराजयः ।
शोभन्ते मृगमाश्रित्य चित्राः कनकबिन्दुभिः ॥२५॥

पश्यास्य जृम्भमाणस्य दीप्तामग्निशिखोपमाम् ।
जिह्वां मुखान्निःसरन्तीं मेघादिव शतह्रदाम् ॥ २६ ॥

मसारगल्वर्कमुखः शङ्खमुक्तानिभोदरः ।
कस्य नामानिरूप्योऽसौ न मनो लोभयेन्मृगः ॥ २७ ॥

कस्य रूपमिदं दृष्ट्वा जाम्बूनदमय प्रभम् ।
नानारत्नमयं दिव्यं न मनो विस्मयं व्रजेत् ॥ २८ ॥

मांसहेतोरपि मृगान्विहारार्थं च धन्विनः ।
घ्नन्ति लक्ष्मण राजानो मृगयायां महावने ॥ २९ ॥

धनानि व्यवसायेन विचीयन्ते महावने ।
धातवो विविधाश्चापि मणिरत्नसुवर्णिनः ॥ ३० ॥

तत्सारमखिलं नृणां धनं निचयवर्धनम् ।
मनसा चिन्तितं सर्वं यथा शुक्रस्य लक्ष्मण ॥ ३१ ॥

अर्थी येनार्थकृत्येन संव्रजत्यविचारयन् ।
तमर्थमर्थशास्त्रज्ञः प्राहुरर्थ्याश्च लक्ष्मण ॥ ३२ ॥

एतस्य मृगरत्नस्य परार्ध्ये काञ्चनत्वचि ।
उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥ ३३ ॥

न कादली न प्रियकी न प्रवेणी न चाविकी ।
भवेदेतस्य सदृशी स्पर्शनेनेति मे मतिः ॥ ३४ ॥

एष चैव मृगः श्रीमान्यश्च दिव्यो नभश्चरः ।
उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ ॥ ३५ ॥

यदि वायं तथा यन्मां भवेद्वदसि लक्ष्मण ।
मायैषा राक्षसस्येति कर्तव्योऽस्य वधो मया ॥ ३६ ॥

एतेन हि नृशंसेन मारीचेनाकृतात्मना ।
वने विचरता पूर्वं हिंसिता मुनिपुङ्गवाः ॥ ३७ ॥

उत्थाय बहवो येन मृगयायां जनाधिपाः ।
निहताः परमेष्वासास्तस्माद्वध्यस्त्वयं मृगः ॥ ३८ ॥

पुरस्तादिह वातापिः परिभूय तपस्विनः ।
उदरस्थो द्विजान्हन्ति स्वगर्भोऽश्वतरीम् इव ॥ ३९ ॥

स कदा चिच्चिराल्लोके आससाद महामुनिम् ।
अगस्त्यं तेजसा युक्तं भक्ष्यस्तस्य बभूव ह ॥ ४० ॥

समुत्थाने च तद्रूपं कर्तुकामं समीक्ष्य तम् ।
उत्स्मयित्वा तु भगवान्वातापिमिदमब्रवीत् ॥ ४१ ॥

त्वयाविगण्य वातापे परिभूताश्च तेजसा ।
जीवलोके द्विजश्रेष्ठास्तस्मादसि जरां गतः ॥ ४२ ॥

एवं तन्न भवेद्रक्षो वातापिरिव लक्ष्मण ।
मद्विधं योऽतिमन्येत धर्मनित्यं जितेन्द्रियम् ॥ ४३ ॥

भवेद्धतोऽयं वातापिरगस्त्येनेव मा गतिः ।
इह त्वं भव संनद्धो यन्त्रितो रक्ष मैथिलीम् ॥ ४४ ॥

अस्यामायत्तमस्माकं यत्कृत्यं रघुनन्दन ।
अहमेनं वधिष्यामि ग्रहीष्याम्यथ वा मृगम् ॥ ४५ ॥

यावद्गच्छामि सौमित्रे मृगमानयितुं द्रुतम् ।
पश्य लक्ष्मण वैदेहीं मृगत्वचि गतस्पृहाम् ॥ ४६ ॥

त्वचा प्रधानया ह्येष मृगोऽद्य न भविष्यति ।
अप्रमत्तेन ते भाव्यमाश्रमस्थेन सीतया ॥ ४७ ॥

यावत्पृषतमेकेन सायकेन निहन्म्यहम् ।
हत्वैतच्चर्म आदाय शीघ्रमेष्यामि लक्ष्मण ॥ ४८ ॥

प्रदक्षिणेनातिबलेन पक्षिणा
जटायुषा बुद्धिमता च लक्ष्मण ।
भवाप्रमत्तः प्रतिगृह्य मैथिलीं
प्रतिक्षणं सर्वत एव शङ्कितः ॥ ४९ ॥

तथा तु तं समादिश्य भ्रातरं रघुनन्दनः ।
बबन्धासिं महातेजा जाम्बूनदमयत्सरुम् ॥१॥

ततस्त्रिविणतं चापमादायात्मविभूषणम् ।
आबध्य च कलापौ द्वौ जगामोदग्रविक्रमः ॥२॥

तं वञ्चयानो राजेन्द्रमापतन्तं निरीक्ष्य वै ।
बभूवान्तर्हितस्त्रासात्पुनः सन्दर्शनेऽभवत् ॥३॥

बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः ।
तं स पश्यति रूपेण द्योतमानमिवाग्रतः ॥४॥

अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिर्महावने ।
अतिवृत्तमिषोः पाताल्लोभयानं कदा चन ॥५॥

शङ्कितं तु समुद्भ्रान्तमुत्पतन्तमिवाम्बरे ।
दश्यमानमदृश्यं च नवोद्देशेषु केषु चित् ॥६॥

छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम् ।
मुहूर्तादेव ददृशे मुहुर्दूरात्प्रकाशते ॥७॥

दर्शनादर्शनेनैव सोऽपाकर्षत राघवम् ।
आसीत्क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः ॥८॥

अथावतस्थे सुश्रान्तश्छायामाश्रित्य शाद्वले ।
मृगैः परिवृतो वन्यैरदूरात्प्रत्यदृश्यत ॥९॥

दृष्ट्वा रामो महातेजास्तं हन्तुं कृतनिश्चयः ।
सन्धाय सुदृढे चापे विकृष्य बलवद्बली ॥१०॥

तमेव मृगमुद्दिश्य ज्वलन्तमिव पन्नगम् ।
मुमोच ज्वलितं दीप्तमस्त्रब्रह्मविनिर्मितम् ॥११॥

स भृशं मृगरूपस्य विनिर्भिद्य शरोत्तमः ।
मारीचस्यैव हृदयं विभेदाशनिसंनिभः ॥१२॥

तालमात्रमथोत्पत्य न्यपतत्स शरातुरः ।
व्यनदद्भैरवं नादं धरण्यामल्पजीवितः ।
म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुम् ॥१३॥

सम्प्राप्तकालमाज्ञाय चकार च ततः स्वरम् ।
सदृशं राघवस्यैव हा सीते लक्ष्मणेति च ॥१४॥

तेन मर्मणि निर्विद्धः शरेणानुपमेन हि ।
मृगरूपं तु तत्त्यक्त्वा राक्षसं रूपमात्मनः ।
चक्रे स सुमहाकायो मारीचो जीवितं त्यजन् ॥१५॥

ततो विचित्रकेयूरः सर्वाभरणभूषितः ।
हेममाली महादंष्ट्रो राक्षसोऽभूच्छराहतः ॥१६॥

तं दृष्ट्वा पतितं भूमौ राक्षसं घोरदर्शनम् ।
जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥१७॥

हा सीते लक्ष्मणेत्येवमाक्रुश्य तु महास्वरम् ।
ममार राक्षसः सोऽयं श्रुत्वा सीता कथं भवेत् ॥१८॥

लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति ।
इति सञ्चिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥१९॥

तत्र रामं भयं तीव्रमाविवेश विषादजम् ।
राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वरम् ॥२०॥

निहत्य पृषतं चान्यं मांसमादाय राघवः ।
त्वरमाणो जनस्थानं ससाराभिमुखस्तदा ॥२१॥

आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने ।
उवाच लक्ष्मणं सीता गच्छ जानीहि राघवम् ॥१॥

न हि मे जीवितं स्थाने हृदयं वावतिष्ठते ।
क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम् ॥२॥

आक्रन्दमानं तु वने भ्रातरं त्रातुमर्हसि ।
तं क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणम् ॥३॥

रक्षसां वशमापन्नं सिंहानामिव गोवृषम् ।
न जगाम तथोक्तस्तु भ्रातुराज्ञाय शासनम् ॥४॥

तमुवाच ततस्तत्र कुपिता जनकात्मजा ।
सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ॥५॥

यस्त्वमस्यामवस्थायां भ्रातरं नाभिपद्यसे ।
इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते ॥६॥

व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते ।
तेन तिष्ठसि विस्रब्धस्तमपश्यन्महाद्युतिम् ॥७॥

किं हि संशयमापन्ने तस्मिन्निह मया भवेत् ।
कर्तव्यमिह तिष्ठन्त्या यत्प्रधानस्त्वमागतः ॥८॥

इति ब्रुवाणं वैदेहीं बाष्पशोकपरिप्लुताम् ।
अब्रवील्लक्ष्मणस्त्रस्तां सीतां मृगवधूम् इव ॥९॥

देवि देवमनुष्येषु गन्धर्वेषु पतत्रिषु ।
राक्षसेषु पिशाचेषु किंनरेषु मृगेषु च ॥१०॥

दानवेषु च घोरेषु न स विद्येत शोभने ।
यो रामं प्रतियुध्येत समरे वासवोपमम् ॥११॥

अवध्यः समरे रामो नैवं त्वं वक्तुमर्हसि ।
न त्वामस्मिन्वने हातुमुत्सहे राघवं विना ॥१२॥

अनिवार्यं बलं तस्य बलैर्बलवताम् अपि ।
त्रिभिर्लोकैः समुद्युक्तैः सेश्वरैः सामरैरपि ॥१३॥

हृदयं निर्वृतं तेऽस्तु सन्तापस्त्यज्यताम् अयम् ।
आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमम् ॥१४॥

न स तस्य स्वरो व्यक्तं न कश्चिदपि दैवतः ।
गन्धर्वनगरप्रख्या माया सा तस्य रक्षसः ॥१५॥

न्यासभूतासि वैदेहि न्यस्ता मयि महात्मना ।
रामेण त्वं वरारोहे न त्वां त्यक्तुमिहोत्सहे ॥१६॥

कृतवैराश्च कल्याणि वयमेतैर्निशाचरैः ।
खरस्य निधने देवि जनस्थानवधं प्रति ॥१७॥

राक्षसा विधिना वाचो विसृजन्ति महावने ।
हिंसाविहारा वैदेहि न चिन्तयितुमर्हसि ॥१८॥

लक्ष्मणेनैवमुक्ता तु क्रुद्धा संरक्तलोचना ।
अब्रवीत्परुषं वाक्यं लक्ष्मणं सत्यवादिनम् ॥१९॥

अनार्य करुणारम्भ नृशंस कुलपांसन ।
अहं तव प्रियं मन्ये तेनैतानि प्रभाषसे ॥२०॥

नैतच्चित्रं सपत्नेषु पापं लक्ष्मण यद्भवेत् ।
त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ॥२१॥

सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि ।
मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥२२॥

कथमिन्दीवरश्यामं रामं पद्मनिभेक्षणम् ।
उपसंश्रित्य भर्तारं कामयेयं पृथग्जनम् ॥२३॥

समक्षं तव सौमित्रे प्राणांस्त्यक्ष्ये न संशयः ।
रामं विना क्षणमपि न हि जीवामि भूतले ॥२४॥

इत्युक्तः परुषं वाक्यं सीतया सोमहर्षणम् ।
अब्रवील्लक्ष्मणः सीतां प्राञ्जलिर्विजितेन्द्रियः ॥२५॥

उत्तरं नोत्सहे वक्तुं दैवतं भवती मम ।

वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि ॥ २६॥

स्वभावस्त्वेष नारीणामेषु लोकेषु दृश्यते ।
विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः ॥ २७॥

उपशृण्वन्तु मे सर्वे साक्षिभूता वनेचराः ।
न्यायवादी यथा वाक्यमुक्तोऽहं परुषं त्वया ॥ २८॥

धिक्त्वामद्य प्रणश्य त्वं यन्मामेवं विशङ्कसे ।
स्त्रीत्वाद्दुष्टस्वभावेन गुरुवाक्ये व्यवस्थितम् ॥ २९॥

गमिष्ये यत्र काकुत्स्थः स्वस्ति तेऽस्तु वरानने ।
रक्षन्तु त्वां विशालाक्षि समग्रा वनदेवताः ॥ ३०॥

निमित्तानि हि घोराणि यानि प्रादुर्भवन्ति मे ।
अपि त्वां सह रामेण पश्येयं पुनरागतः ॥ ३१॥

लक्ष्मणेनैवमुक्ता तु रुदती जनकात्मजा ।
प्रत्युवाच ततो वाक्यं तीव्रं बाष्पपरिप्लुता ॥ ३२॥

गोदावरीं प्रवेक्ष्यामि विना रामेण लक्ष्मण ।
आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः ॥ ३३॥

पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम् ।
न त्वहं राघवादन्यं पदापि पुरुषं स्पृशे ॥ ३४॥

इति लक्ष्मणमाक्रुश्य सीता दुःखसमन्विता ।
पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह ॥ ३५॥

तामार्तरूपां विमना रुदन्तीं
सौमित्रिरालोक्य विशालनेत्राम् ।
आश्वासयामास न चैव भर्तुस्
तं भ्रातरं किं चिदुवाच सीता ॥ ३६॥

ततस्तु सीतामभिवाद्य लक्ष्मणः
कृताञ्जलिः किं चिदभिप्रणम्य ।
अवेक्षमाणो बहुशश्च मैथिलीं
जगाम रामस्य समीपमात्मवान् ॥ ३७॥